इति । तथा मध्योपायस्तथाधिमात्रोपाय इति, तत्राधिमात्रोपायानाम्" भा० "तीव्रसंवेगानामासन्नतमः" पात०सू०। "समाधिलाभः समाधिफलञ्च भवतीति" भाष्यम् ननु श्रद्धादयश्चेद्योगोपायास्तर्हि सर्वेषामविशेषेण समाधितत्फले स्यातां दृश्यते तु कस्यचित्सिद्धिः कस्यचिदसिद्धिः कस्यचिच्चिरेण सिद्धिः कस्यचिच्चिरतरेण सिद्धिः कस्यचित्क्षिप्रमित्यत आह, "ते खलु नवयोगिन" इति । उपायाः श्रद्धादयो मृदुमध्याधिमात्राः प्राग्भवीयसंस्काराद्दृष्टवशाद्वा येषां ते तथोक्ताः संवेगोवैराग्यं तस्यापि मृदुमध्यतीव्रता प्राग्भवीयवासनाद्दृष्टवशादेवेति तेषु यादृशां क्षेपीयसी सिद्धिस्तान् दर्शयति सूत्रेण, "तीव्रसंवेगानामासन्नतमः इति सूत्रम्" विव०।

**तीव्रकण्ठ** पु० तीव्रः कण्ठो यस्मात् ५ब० । सेवनेन कण्ठपीडके १सूरणे (ओल)रत्नमा० तस्य सेवने हि कण्ठोद्वेजिता लोकप्रसिद्धा ।

**तीव्रकन्द** पु० तीव्रः कन्दोऽस्य । सूरणे राजनि० ।

**तीव्रगन्धा** स्त्री तीव्रो गन्धो यस्याः । यवान्यां राजनि० । २तीव्रगन्धयुक्ते त्रि० । कर्म्म० । ३तीव्रे गन्धे पु० ।

**तीव्रज्वाला** स्त्री तीव्रं यथा तथा ज्वालयति उद्वेजयति सेविनम् ज्वल-णिच्-अच् । १धातक्याम् राजनि० । तत्स्पर्शने हि गात्रे व्रणजन्म लोकप्रसिद्धमिति तस्यास्तथात्वम् २तीव्रज्वालायुक्ते त्रि० । कर्म० । ३तीव्रायां ज्वालायां स्त्री ।

**तीव्रदारु** न० कर्म्म० । १तीव्रे दारुणि । तस्य विकारः रजता० अञ् । तैव्रदारव तद्विकारे त्रि० स्त्रियां ङीप् ।

**तीव्रबन्ध** पु० तीव्रो बन्धो यस्मात् । तामसगुणे "दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता" गीतायां तामसकार्य्यासुरसम्पदोबन्धहेतुत्वोक्तेस्तथात्वम् ।

**तीव्रवेदना** स्त्री कर्म्म० । घोरायां यातनायाम् अमरः ।

**तीव्रसंवेग** पु० कर्म्म० । तीव्रवैराग्ये तीव्रशब्दे दृश्यम् ।

**तीव्रा** स्त्री तीव्र+टाप् । १गण्डदूर्वायां २कटुरोहिण्यां ३राजिकायां (राइसरिषा) मेदि० । ४नदीभेदे शब्दर० । ५महाज्योतिष्मत्यां ६तरदीवृक्षे ७तुलस्याञ्च राजनि० । ८तीव्रवेगयुक्तस्त्रीमात्रे च ।

**तीव्रानन्द** तीव्र आनन्दोऽस्य । शिवे शिवसहस्रनाम ।

**तु** वृत्तौ (वृद्धौ पा०)अक० हिंसायां पूर्त्तौ च सक०अदा०पर० अनिट् । तौति तवीति । अतौषीत् । अत्र "नाभ्यस्तस्याचि पिति सार्वधातुके" ७।३।८७। "सूत्रतः सार्वधातुके इत्यस्यानुवृत्तिसम्भवेऽपि "तुरुस्तुशम्यमः सार्वधातुके" ७।३।९५ पा०सूत्रे "पुनः सार्वधातुकग्रहणमपिदर्थमिति" सि०कौ०। तेन "उतो वृद्धिर्लुकि हलि" ७।३।८९पा०सूत्रात् हलीत्यस्य "ब्रुव ईट्" ७।३।९३पा०सूत्रात् "ईटः यङो वा" सू०वेत्यस्य चानुवृत्तिः न पितीत्यस्य तेन तुवीतः तुतः तुवीथः तुथः। अचि तु न । तुवन्ति । मुग्धबोधकृत्तु हलीत्यस्यानुवृत्तिवत् पितीत्यस्यानुवृत्तिरिति बभ्राम" तेन तन्मते तुत इत्येव इति भेदः। तुताव । वेदे तुजादि०अभ्यासदीर्घः। "स तूताव नैनमश्नोत्यंहतिरग्ने !" ऋ० १।९४।२ "ब्रह्मा तूतोदिन्द्रो गातुमिष्णन्" ऋ०२।२०।५। तु वृद्धावित्यस्य लङि बहुलं छन्दसि विकरणस्य लुः । अडागमाभावश्च" भा० ।

**तु** अव्य० तुद-मितद्रु०डु । १पादपूरणार्थे निरर्थके । "निरर्थकं तुह्यीत्यादि पूरणैकप्रयोजनम्" चन्द्रालोकः । २भेदे ३अवधारणे अमरः। ४समुच्चये ५पक्षान्तरे ६नियोगे ७प्रशंसायां८विनिग्रहे शब्दर०तत्र पक्षान्तरे "आचारेण तु संयुक्तः संपूर्णफलभाक् भवेत्" मनुः। समुच्चये "उष्ट्रयानं समारुह्य खरयानं तु कामतः । स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति" मनुः । पूजायामेतद्योगे "तुपश्यपश्यताहैः पूजायाम्"पा०तिङन्तं न निहन्यते"आदह सुधाम तु पुनर्गर्भत्वमेरिरे" सि० कौ० धृता श्रुतिः ।

**तुकाक्षीरी** स्त्री तुगाक्षीरी+पृषो० । वंशरोचनायाम् हेम० ।

**तुच्छ** त्रि० तुष-बा० क्स । तोषयुक्ते ततः पक्षा० चतुरर्थ्यां फक् । तौक्षायण तत्सन्निकृष्टदेशादौ त्रि० ।

**तुखा(षा)र** पु०विन्ध्यपर्वतस्थे जातिभेदे । "ये चान्ये विन्ध्यनिलयास्तुखा(षा)रास्तुम्बरास्तथा। अधर्म्मरुचयस्तात ! विद्धि तान् वेणसम्भवान्" हरिवं० ५अ० ।

**तुगा** स्त्री तुज-बा० घ किच्च । वंशरोचनायां राजनि० ।

**तुगाक्षीरी** स्त्री तुगैव क्षीरी । वंशरोचनायाम् राजनि० ।

**तुग्र** न० तुज-रक् न्यङ्क्वा० जस्य गः । अश्विनीकुमारयोः शिष्ये राजर्षिभेदे । "तुग्रोह भुज्युमश्विनोदमेघे रयिं न कश्चिन् मम्रवाँ अवाहाः" ऋ०१।११६।२ । अत्रेयमाख्यायिका । "तुग्रो नामाश्विनोः प्रियः कश्चिद्राजर्षिः । स च द्वीपान्तरवर्त्तिभिः शत्रुभिरत्यन्तमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत् । सा च नौर्मध्ये समुद्रमतिदूरं गता वायुवशेन भिन्नासीत् । तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव" भा० । "ता भुज्युं विभिरद्भ्यः समुद्रात् तुग्रस्य सूनुमूहथूरजोभिः" ऋ०६।६२।६। "ता तौ अश्विनौ युवां